tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

sai409
Fate
19.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation

प्रावेशिकी

प्रत्यक्षे पङ्गुनि शब्द एव प्रगल्भते मानवानामवदानमनुसन्धातुम्। शब्दोऽपि स्फोटात्मा। ततश्च सोऽपि पङ्गुरेव विना भगवतीमभिव्यक्तिम्। अभिव्यक्तिश्च लिपेरिव चित्रादिभ्योऽपि जायते। अयं पुनर्विशेषो यच्चित्रादिना साऽनुमानादि-प्रमाणान्तरपरवशतयैव जायते! ततश्च मकरवक्त्रमणिमनुहरति सा प्रत्यभिज्ञाने। इदमेव कारणं यद् ज्ञेदवाङ्मयात् पूर्ववर्त्तिन्याः सिन्धुसभ्यताया अवशेषाः साम्प्रत-मपि रहस्यमुद्रां न जहति। विद्वांसस्तत्र वहोः कालाद् व्यापृता अपि न ह्येव मुच्यन्ते विचिकित्सापाशात्।

डॉ० फतहसिंहः सिन्धुसभ्यताया अवशेषेषु यानि चित्राणि तेषु वेदमन्त्रलिपि-मनुवीक्षते। तदर्थमसौ यानपि तर्कान् प्रास्तौति तेष्वपेक्ष्यतेतरामवधानं पुराविदाम्। 'सिन्धुलिपिरहस्योद्घाटनम्' डॉ० फतेहसिंहस्य महतः परिश्रमस्य फलम्। एतदर्थं प्रज्ञावद्भिश्चं विदुषेऽस्मै नितान्तमेव कृतज्ञः। विद्वांसः स्थापनामिमामनुवीक्षेरन्निति

निवेदयति—

विदुषां वशंवदः
उपाध्यायः श्रीरामः

श्रीकृष्णजन्माष्टमी २०२७
सागरम्

Sai 409
Fate
19.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

SRI AUROBINDO LIBRARY PONDICHERRY (India)

अथेदमुद्घाट्यते सिन्धुलिपे रहस्यम्। तत्र पूर्वं—

सिन्धुसभ्यतायाः शोधवृत्तम्

अस्ति अस्माकं देशे सिन्धुनामा महानदो यो हिमालयस्य मानसनाम्नो महासरसो निस्सृत्य काश्मीरपञ्चनन्दसिन्धुप्रदेशेषु च प्रवहन् पश्चिमसमुद्रं प्रविशति स्वजलराशिं च प्रेषयति। अस्यैव सिन्धुनदस्य तटवर्तिनोः मोहनजोदरोहडप्पनाम्नोः अतिप्राचीननगरयोः ध्वंसावशेषा वर्तमानशताब्दयाः प्रथमचरणे उत्खाताः, तत्र च काचित् प्रागैतिहासिकी सभ्यता दृष्टा। यद्यपि सिन्धुतटप्रदेशे एव प्रथमम् उपलब्धत्वात् सा सभ्यता सिन्धुसभ्यतानाम्ना आख्याता, परमिदानीं तु विलोचिस्थानाद् आरभ्य पूर्वदिशि गङ्गायमुनयोः मध्यवर्तिआलमगिरपुरपर्यन्तम्, उत्तरदिशि च पञ्चनदाद् आरभ्य सुदूरसौराष्ट्रप्रदेशस्य लोथलपर्यन्तम् इयमेव प्रागैतिहासिकी सभ्यता उपलब्धा, अतएव नाऽऽसीत् सा सभ्यता केवलं सिन्धुतटवर्तिनी, परम् अस्याः क्षेत्रं सुविस्तीर्णम् आसीत् इति सुनिश्चितमेव। गतवर्षे एव गौहाटीनाम्नि नगरेऽपि अस्याः सभ्यताया अवशेषा उपलब्धाः इति समाचारपत्रेषु विज्ञापितमासीत्। यदि सत्यमेतत्, तर्हि सिन्धुसभ्यतायाः क्षेत्रं तु सुविस्तीर्णतरं भविष्यति। दिवं गतस्य फादरहेरासमहोदयस्य मतानुसारं तु अस्याः सभ्यतायाः प्रसारः पश्चिमसमुद्रतटमनुसृत्य सुदूरदक्षिणदेशपर्यन्तम् आसीत्। यदि एतदपि अनुमानं सत्यतां भजते, तर्हि तु तथाकथिता सा सिन्धुसभ्यता अखिलभारतीया एव भविष्यति। परम् अधुना तु सा सिन्धुसभ्यता एव उच्यते।

अस्याः सभ्यताया गवेषणा आधुनिके युगे तु गतशता-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

d by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

व्यन्तिमे चरणे एव समारब्धा। यदा षडावेंशत्यधिकाष्टादशशततमे (१८२६) वर्षे मर्सन-(Marson) महोदयेन, पञ्चवर्षानन्तरं वर्नेस-(Burnes) महोदयेन, त्रिपञ्चाशदधिके अष्टादशशततमे वर्षे च कनिंघममहोदयेन हडप्पानगरस्य योजनाधिकविस्तीर्णाः क्षुद्रपर्वतोवमपिण्डलाः उत्खाताः। यद्यपि तत्रोत्खननकार्यं तु १६२०-२१ तः पूर्वं न समारब्धम्, परन्तु १८७५ वर्षस्य सर्वेक्षणविवरणे (Survey Report) सर एलेक्जेन्द्रकनिंघमेन तस्य स्थानस्य सामान्यं परिचयमुपस्थापयता तत्र प्राप्ताः काश्चिन्मुद्रा अन्या च पुरातत्त्वसामग्री प्रकाशिताः। वर्तमानशताब्द्याः प्रथमचरणान्तिमभागः निस्सन्देहं सिन्धुसभ्यतागवेषणाया अतिमहत्त्वशालि युगमास्ीत्। आस्मिन्नेव काले डा० राखालदासबनर्जीमहोदयेन सिन्धुप्रदेशस्थमोहनजोदरो नाम नगरमपि सर्वप्रथमं दृष्टम्। तस्य नगरस्य उत्खननं तु १६२२-१६२७ वर्षेषु कृतम्।

परन्तु सिन्धुसभ्यताया वास्तविकी गवेषणा तु तदैव समारब्धा यदा भारतवर्षस्य पुरातत्त्वविभागाध्यक्षेण सर-जोनमार्शलमहोदयेन 'Mohenjodaro and the Indus civilization,' इति त्रिखण्डात्मको महाग्रन्थः १६३१-वर्षे प्रकाशितः। तत्पूर्वमपि पुरातत्त्वविभागस्य वार्षिकाणि विवरणानि प्रकाशितानि आसन्। तानि आश्रित्य बहवो भारतीयविद्वांसोऽपि सिन्धुसभ्यतामधिकृत्य यत्किञ्चिद् विचारयितुं विवेक्तुं लेखितुञ्च कृतप्रयत्ना अभवन्। तेषां प्रयासाः मार्शल-महोदयस्य प्रीतये नाभवन्। एतदभिलक्ष्यैव तेन निजमहाग्रन्थस्य भूमिकाभागे इदं भर्त्सनं तर्जनञ्च प्रकटितम्— "तथ्यानां गणनैव न सर्वार्थसाधिका। विद्वद्भिस्तानि तथ्यानि सम्यग्रूपेण अवगन्तव्यानि, अवगत्यैव च निर्वक्तव्यानि। एतादृशं निर्वचनन्तु तदैव सम्भविष्यति यदा तस्य युगस्य ज्ञानं बहुविधैरुपायैः समृद्धतरं भवेत्। एतत्कार्यन्तु अद्य वा श्वो वा तैरेव विशेषज्ञैः सम्पादनीयं ये अस्मिन् विषये सम्यक् कृतपरिश्रमाः स्युः। भारतीयविदुषां कृतः परिश्रमस्तु अस्मिन् विषये प्रमत्तानां प्रलापतमेव अस्ति। एष प्रयत्नस्तु गवेषणापथे बाधाम् एव समुपस्थापयिष्यति।" मार्शलमहोदयस्य एतत्तर्जनेन डा० राखालदासबनर्जीमहोदयो राज्यसेवातो निष्कासितः अकालमृत्युमुखे च निपातितः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

मार्शलमहोदयस्तु स्वमहाग्रन्थप्रकाशने निमित्तमात्रमेव तत्र सर्वं कार्यन्तु डा० मैके-लैङ्ग्डन-साहनीप्रभृतिभिः विद्वद्भिः सम्पादितम्। तेष्वपि डा० मैकेमहोदयस्य प्रयत्नोऽतिश्लाघनीयः तेनैव न केवलं मार्शलसम्पादितस्य ग्रन्थस्य पञ्चदशाध्याया एव लिखिताः, अपितु १९२७-३१ वर्षेषु मोहनजोदरोनगरस्य उत्खननसामग्रीमधिकृत्य 'Further Exacavation of Mohenjodaro' इति शीर्षकेण द्विखण्डात्मको ग्रन्थो लिखितः। १९४० वर्षे 'Exacavatjon of Harappa' इति शीर्षकस्य माधवस्वरूपवत्समहोदयेन प्रकाशितस्य ग्रन्थस्यापि समायोजने डा० मैकेमहोदयस्य सहयोग आसीत्। डा० मैकेमहोदयो मैसोपोटामियानगराणाम् उत्खनने कृतश्रमः सुमेरसभ्यताया विशेषज्ञ आसीत्।

मार्शलमैकेवत्समहोदयैः सम्पादितेषु ग्रन्थेषु ययोर्नगरयोः विवरणमुपस्थापितं तयोरन्यतरस्य मोहनजोदरोनगरस्य ध्वंसावशेषैः विश्वस्य एका अभूतपूर्वा स्थापत्यकला नगरनिर्माणयोजना च प्राकट्यमुपयाता। पक्वेष्टिकानिर्मितगोपुरपरिवेष्टिते एकस्मिन् महानगरे लम्बवत् सङ्क्रममाणाः सचत्वराः सुविस्तृतराजमार्गाः; प्रतिमार्गमुभयतः स्थितानि पंक्तिबद्धानि गृहाणि; स्नानागारसमन्वितानि विशालभवनानि, स्फीताकारयुक्ताः सभामण्डपाः; उपभुक्तजलस्य वर्षाजलस्य च प्रवाहकं प्रणालिकाजालम्; कूपजलभरिता गृहजलाशयाः; महाकूपाः, महाद्वाराणि; महत्यो भित्तयः, महेष्टिकादयः अन्ये च शिल्पसम्भारा महदाश्चर्यमुत्पादयन्ति। नानाविधेषु वस्तुजातेषु आभरणानि, रत्नानि, मूर्त्तयः, क्रीडनकानि; मृण्मयपात्राणि, सचित्राणि, चित्ररहितानि च घटकपालानि विविधरूपा मुद्राश्च विशेषरूपेण उल्लेखनीयानि सन्ति।

तत्र मुद्रासु लिपिबद्धा लेखा अपि दृश्यन्ते। तास्तु प्रायेण सचित्रा एव, परं क्वचित् चित्ररहिता अपि सन्ति। तेषु चित्रेषु कश्चिद् एकशृङ्गः पशुः बाहुल्येन उपलभ्यते, परन्तु महावृषभः, वप्रक्रीडारतो बलीवर्दः; गजः, खड्गी (गण्डकः); व्याघ्रः; क्रमेलकः, गर्दभः; महिषः, अजः, मकरश्चापि तत्र सन्ति एव। क्षुद्रजन्तुषु तत्र गोधा, वृश्चिकः, मयूरः सर्पश्च बहुधा प्राप्यन्ते। हडप्पानगरे प्राप्तायाम् एकस्यां मुद्रायां दृश्यते कश्चिद् उड्डयनोन्मुखो गृद्धः, यस्य वामपार्श्वे सर्पः,

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

d by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,

दक्षिणपार्श्वे चैको मयूरो वर्तते। क्वचित् समवेतपशुचित्राण्यपि सन्ति यथा मकरपृष्ठो गजः, पशुशृंगधरः पुच्छविषाणधरो वा मनुष्यः; वृषभशृङ्गः शार्दूलः; मनुष्यमुखो मेषः; गजपादो महिषः; सयुजौ उष्ट्रौ; यमलौ एकशृङ्गौ, सहवर्तिनौ हरिणौ च। समवेतपशुषु सर्वाधिकाश्चर्यकरः कश्चित् सर्पपुच्छो गजकरो मनुष्यमुखो गोपादः शार्दूलचर्मा च पशुर्वर्तते। अन्यत्र पश्चार्द्धशार्दूलाकृतिः, पूर्वार्द्धनराकृतिः मेषशृङ्गः पशुरपि महदाश्चर्यं जनयति। यस्मिन् कस्मिन् चित्रे मनुष्यस्य पशोर्वा सन्निधौ वृक्षोऽपि दृश्यते यथा एको वृक्षस्थः पुरुषः वृषभशृङ्गं व्याघ्रं ताडयति, काचित् पुरुषाकृतिः वृक्षाय उकारं ददाति। नवपल्लवः, द्विकिसलयः पिप्पलवृक्षः एकशृङ्गिणा पशुद्वयेन संयुक्तो वर्तते। पुरुषद्वयेन पिप्पलवृक्षो धार्यते, पिप्पलवृक्षपरिवेष्टितः काश्चत् पुरुषः एकतः पंक्तिबद्धैः सप्तपुरुषैः स्तूयते अन्यतस्तु तं वृक्षं मनुष्यमुखेन मेषेण युक्तः पुरुषः स्पृशति। पिप्पलवृक्षः प्रायशस्तु अधोमूल ऊर्ध्वशाख एव उपलभ्यते, परं क्वचिद् ऊर्ध्वमूलोऽपि अस्ति। वृक्षेषु शमीवृक्षो बाहुल्येन चित्रितोऽस्ति, क्वचिन् नारिकेलप्रभृतयो वृक्षा अपि दृश्यन्ते।

सन्ति तत्र चित्राणि येषु योगमुद्रासीनः पुरुषो मञ्चारूढस्तिष्ठति। अन्येषु ईदृशेषु चित्रेषु स पुरुष एकाकी एव दृश्यते, परम् एकस्मिन् चित्रे स षट्पशुभिः आवृतः, तस्य शरीरञ्च दृढकवचावृतं च वर्तते। स पशुपतिः शिवो महायोगी वा मन्यते विद्वद्भिः। शिवलिङ्गाकाराणि अनेकानि वस्तूनि दृष्ट्वा शैवोपासना सिन्धुसभ्यतायाः एका विशिष्टता इति स्वीक्रियते। अनेका मूर्तयः अनेकानि चित्राणि नार्याकृतीन्यपि प्राप्यन्ते। जानमार्शलमहोदयस्ता आकृतीर्जगदम्बाविग्रहान् अमन्यत; अतः शाक्तोपासनाऽपि सिन्धुसभ्यताया अन्या विशिष्टता स्वीकृता। काश्चित् लतापत्राङ्कितां योगारूढाकारधारिणीं महतीं मूर्त्तिं भरतचक्रवर्तिनः बाहुबलिनामानं भ्रातरं मत्वा, घातकशस्त्राणाञ्च अभावं दृष्ट्वा, सिन्धुसभ्यता अहिंसाप्रधाना श्रमणसंस्कृतिरित्यपि उद्घोषितं जैनविद्वद्भिः। नगरं सुदृढप्राचीरयुक्तं दृष्ट्वा, इदमेव ऋग्वेदवर्णितं दस्युपुरम् इति मत्वा, सिन्धुसभ्यता दस्यूनामनार्याणामेव सभ्यता इति उद्घोषितं मार्शलमहोदयेन। कथं मोहनजोदरोप्रभृतिनगराणि विनाशं गतानि इति विषये ऋग्वेदोल्लिखितं पुरन्दरशब्दम-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

वलम्ब्य आर्या एव तेषां नगराणां विदारयितार इति च प्रतिपादितम्। के ते दस्यवः, कुत्र च ते गता इति विषये ब्राह्मीभाषायाः द्रविडभाषया सह किञ्चित् साम्यमुपलभ्य आधुनिकद्राविडा एव ऋग्वेदीया दस्यव आसन्; यान् वैदिका आर्याः हडप्पामोहनजोदरोनगराभ्यां निष्कास्य दक्षिणदिशि निक्षिप्तवन्तः पुरा इति निर्णीतं पुराविद्भिः। पुनश्च इममेव निर्णयं द्रढीकर्तुं बहूनि प्रमाणानि संचितानि। ऋग्वेदवर्णिताः शिश्नदेवाः, खलु एते सिन्धुसभ्यतास्रष्टारः पूर्वद्राविडाः शैवा इत्येकम्। ऋग्वेदे ये 'अनासाः' कृष्णवर्णा, अदेवयवो दस्यवस्तेऽपि दक्षिणभारतस्य द्राविडानां पूर्वजा इति द्वितीयम्। द्रविडभाषासु वैदिकसंस्कृते च ये सामान्याः शब्दाः तेऽपि द्राविडसंसर्गादेव इति तृतीयम्।

अतएव सिन्धुसभ्यता द्रविडसभ्यता एव इत्येव डिण्डिमघोषः सर्वत्रैव कृतो महापण्डितैः। भाषाविज्ञानेन, इतिहासेन, नृवंशविज्ञानेन, मानवशास्त्रेण, समाजशास्त्रेण, राजनीतिशास्त्रेणाऽपि इदमेव मतं प्रमाणीकृतम्। परस्परं भावयद्भिरेतैः विद्वद्भिः एष निर्बन्धः परमसत्यरूपेण उद्घोषितः, लालाटिकभूतैरन्यैश्च तथैव स्वीकृतः। आसन् केचन विद्वांसो विपरीतमतवादिनः—ह्राङ्गी-प्राणनाथ-रामचन्द्रन्-शंकरानन्द-राजमोहननाथप्रभृतयः, परन्तु ते तु कटुसमालोचनेन प्रताडिताः, षड्यन्त्रेण निरस्ताः अवमानेन उपेक्षिता मार्शल-मैके-हेरासशिष्यपरम्परया।

इत्थम्भूतायां परिस्थितौ अनेन जनेन अस्मिन् विषये प्रयत्नः समारब्धः। अतएव प्रथमं तु सिन्धुसभ्यता द्रविडसभ्यता एव इति कृत्वा मया किञ्चिद् अधीतम्। सर्वेषां मतानामालोडने कृते एका एव त्रुटिः निरपवादरूपेण स्फुटं भवति—यत् सन्ति केचिल्लिपिबद्धा लेखाः सिन्धुमुद्रासु, परन्तु तल्लिपिज्ञानाभावात् लेखानामर्थम् अज्ञात्वा केवलम् अन्यसामग्रीबलेनैव सिन्धुसभ्यताया व्याख्या कृता विद्वद्भिः। एतत्त्रुटिनिवारणार्थमेव प्रयत्नो विधेय इति मनसि कृत्वा केयं लिपिः, कस्यां भाषायां लिखिता, किञ्च लिखितं वर्तते मुद्रालेखेषु इति मनसि चिन्तयता गतस्य एकोनसप्तत्यधिकै-कोनविंशतितमस्य खिष्टाब्दस्य जुलाईमासे दैवाद् अस्मिन् विषये यः कश्चित् प्रकाशोऽनेन जनेन लब्धः तेनैव उद्घाटिता सिन्धुलेखानां वर्णमाला, उद्घोषिता चात्र

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

d by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

आर्षसंस्कृतेः वैदिकसंस्कृतस्य च उपस्थितिः। तदानन्तरं एतद्विषयकं नवतिपृष्ठात्मकं प्रथमं लेखं धारयन्ती 'स्वाहानाम्नी' त्रैमासिकी पत्रिका दिसम्बरमासे प्रकाशिता। अस्मिन्नेव काले फिनलैण्डदेशस्य परपोलावन्धू, अस्माकं देशस्य कृष्णरावमहोदयश्च सिन्धु-लिपि-पठने स्वं स्वं साफल्यमुद्घोषितवन्तौ। पुनरपि फरवरीमासे 'इण्डस सिविलीजेशन इन राजस्थान' इति शीर्षकेण प्रकाशितं व्याख्यानद्वयं चोपासनीशोधसंस्थाने दत्त्वा, राजस्थानस्थितकालीबङ्गानाम्नि स्थाने उत्खनितस्य नगरस्याऽपि संस्कृतिं लिपिं भाषां च मोहनजोदरोहडप्पा-नगरयोः संस्कृतिवत् वैदिकीमेव उद्घोषितवान् अयं जनः।

अक्टूबरमासे या स्वाहा प्रकाशिता तत्रापि अस्य जनस्य आक्षेप-निरसनपूर्वकं स्वमतप्रतिपादनार्थं च षष्टिपृष्ठात्मको लेखः प्रकाशितः, अन्यौ च द्वौ धाराप्रवाहरूपेण प्रकाश्यमानौ ग्रन्थौ च तत्रैव समा-रब्धौ। अद्यावधि पञ्चविंशतिशतकादपि अधिकान् सिन्धुलेखान् स्वोद्घाटितवर्णमालावलेन पठित्वा, भवतां समक्षं स्वमतं स्थापयितुं सागरविश्वविद्यालस्य निमन्त्रणञ्च बहुमन्यमान उपस्थिताऽयं जनः तदर्थं धन्यवादं निवेदयति।

तत्र का नाम सा लिपिः, कथं सा उद्घाटिता, का च तस्या वर्ण-माला इति इदं सर्वं तु द्वितीयस्य व्याख्यानस्य विषयः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

सिन्धुलिपिः

सिन्धुसभ्यतायां अवशेषेषु अनेका लेखयुक्ता मुद्रा दृष्ट्वा पुरातत्वज्ञा आश्चर्यचकिता अभवन् ; यतो हि नाम तत्पूर्वं तु ब्राह्मी खरोष्ट्री चेति लिपिद्वयमेव विज्ञातमासीत्। परन्तु अधुना तु काचित् प्राचीनतरा लिपिरुपलब्धा यस्याः मिस्र-सुमेरध्वंसावशेषेषु प्राप्तया लिप्या सह न केवलं सादृश्यमेव दृश्यते अपितु सिन्धुलिपि-बद्ध-लेखयुक्ताः काश्चिन्मुद्राः २८०० ई० पू०—वर्षपुरातनेषु सुमेरसभ्यतावशेषेषु अपि उपलब्धाः, एतस्मान्न केवलं सभ्यताद्वयस्य अपितु लिपिद्वयस्यापि सम्बन्धः सूच्यते। अनेनैव कारणेन सिन्धुलिपिः मिस्रमूला सुमेर-मूला वा इति अवधारयितुं विद्वांसस्तस्याः पठने प्रवृत्ताः।

सिन्धुलिपेः सर्वाधिका विशिष्टता तु इयमेव वर्तते यत् सिन्धुलिपि-बद्धो लेखः चित्रमालिका इव प्रतिभाति। सन्ति तत्र मनुष्यमत्स्या-द्याकाराणि बहूनि चिह्नानि। अतः मिस्रीया लिपिरिव सिन्धुलिपिरपि चित्रलिपिरेवाऽस्ति इति स्वाभाविकं मतमाश्रित्य विदुषां गवेषणा प्रारब्धा। अस्मिन्विषये नृवंशवादप्रेरितैर्विद्वद्भिः एव प्रयत्नोऽपि त्रिधा कृतः—सिन्धुलिपिः सेमेटिकमूला इति एकं मतम्, आर्यमूला इति द्वितीयम् ; द्रविडमूला इति तृतीयम्। तत्र स्मिथ-गैडे-हण्टरादयस्तु प्रथमं मतं, वैडेलशङ्करानन्दराजमोहननाथ-प्रभृतयो विद्वांसो द्वितीयं, फादरहेरासादयस्तु तृतीयं मतं प्रतिपादयन्ति।

भारतीयेतिहासस्य संस्कृतेश्च यथार्थस्वरूपाधिगमे आधुनिक-विदुषां नृवंशवादमूला दृष्टिरेव अवरोधमुपस्थापयति। अर्वाचीन-विमर्शपद्धतेः वैज्ञानिकता श्लाघनीया नूनम्, तथापि नृवंशवाद-कारणादत्र पूर्वाग्रहो जायते, तस्माद् एषा वैज्ञानिकी दृष्टिः कलुषिता भवति, अभिमतफलस्य प्राप्तौ च असमर्था जायते। सिन्धुलिपेरन्वेष-णमस्ति अस्य विषयस्य स्पष्टं निदर्शनम्। षष्टिवर्षेषु सिन्धुलिपिमधि-कृत्य यानि शोधकार्याणि कृतानि तानि सर्वाणि सिन्धुलिपिः द्रविड-वंशमूला वा आर्यपरिवारमूला वा इति प्रतिपादनपराण्येव। मया अपि प्रथमं इयं लिपिः द्रविडमूला एव स्वीकृताऽऽसीत्, किन्तु अनया

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

d by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

रीत्या यदा अस्याः स्वरूपं स्पष्टं न जातं, यदा च आर्यद्रविडवंशयोरस्तित्वमेव सन्देहपदवीम् आरूढम्, तदा नृवंशवादसिद्धान्तं सर्वथा परित्यज्य अहं विविधलिपीनां तुलनात्मकाध्ययनेन कस्यापि समस्तदोषविवर्जितमार्गस्य अन्वेषणे प्रवृत्तः।

हिन्दीलिपेः उर्दूलिपेश्च एकमूलत्वम् [चित्र सं० ३] p.3

अनेन तुलनात्मकाध्ययनेन हिन्दीलिप्याम् उर्दूलिप्यां चाद्भुतं सादृश्यं मया परिलक्षितम्। विद्वांस इदं मन्यन्ते यद् हिन्दीलिपिस्तु हिन्दूनाम् आर्याणां च लिपिरस्ति, उर्दूलिपिस्तु इस्लामधर्मावलम्बिनां सेमेटिकजनानाम्। तयोरेका वामतो दक्षिणगामिनी अपरा तु दक्षिणतो वामवर्तिनी अस्ति। अतः कथं स्यात् एकत्वमुभयोः? परं यदा पूर्वाग्रहं परित्यज्य भारतीयदृष्ट्या आसां लिपीनां सम्यगध्ययनं कृतं तदा तयोरद्भुतं मौलिकमेकत्वं सुस्पष्टं दृष्टिपथमायातम्। उर्दूलिपिगतोऽलिफ एव हिन्दीवर्णमालायाः सर्वेषु अक्षरेषु ह्रस्वदीर्घरूपेण दण्डाकारेण विद्यमानोऽस्ति। यदि अयं दण्डाकारोऽलिफः, शिरोरेखा च हिन्दीवर्णेभ्योपृथक् क्रियेत तदा हिन्दीवर्णानां यद्रूपम् अवशिष्यते, तदधिकं अनुकरोति संवदति वा उर्दूलिपेः 'ऐन' इति अक्षरं वामावर्तं कृत्वा तस्य दक्षिणपार्श्वे दण्डाकारः अलिफः संयुज्येत, तदा हिन्दीगुजरातीब्राह्मीलिपीनां अवर्णस्य पूर्वरूपं निष्पद्यते; अनेनैव प्रकारेण उर्दूलिपेः जवरः, जेरः, पेशश्च क्रमेण हिन्दीलिपेः 'आ इ उ' अक्षराणां मात्रासु दरीदृश्यन्ते। उर्दूलिपेः'इये''जेर' इति द्वयोः अक्षरयोः स्वरूपं हिन्दीलिपेः 'इ'अक्षरे समुपलब्धं भवति, 'उ' अक्षरेऽपि अधोवर्त्तिपेशसंयुक्तोऽलिफः एव। उर्दूलिपिस्थितेषु नून-मीम-तनवीन-नूनगुन्नारूपसानुनासिकेषु वर्णेषु हिन्दीभाषाया दण्डाकाररहितानां न—म—ञ—ङ—ण—चन्द्रविन्दूनां किञ्चिद्रूपमस्ति एव। उर्दूलिपिस्थितानां रे—तोय—लाम—इये (लघ्वी) वर्णानां र—त—ल—य—रूपहिन्दीवर्णैः; श्वाददुश्चमीहे—चे—दालवर्णानां च हिन्दीस्थितैः श—ह—च—दवर्णैः यथाक्रमं स्पष्टं सादृश्यं प्रतीयते।

लिपेराविष्कारः

हिन्दी-उर्दूलिप्योः तुलनात्मकाध्यायनेनोभयोर्मूलम् एकमेवेति

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

प्रतीयते। तयोर्भेदस्य कारणन्तु इदमेवास्ति यद् हिन्दीलिपिस्तु यथार्थेन दर्शनानुक्रमेण सुघटिता आसीत्। एषा देवनागरी लिपिस्तु 'अष्टचक्रा नवद्वारा देवानां पूरयोध्या' इति मन्त्रे कथितस्य देवपुरस्यैव लिपिरस्ति। अस्य दर्शनस्य इदमेवाधारभूतं तथ्यं यद् अकाररूपः स्वरात्मा नानास्वराणां रूपं कृत्वा व्यञ्जनानि व्यनक्ति। अतः कखादयः ध्वनयः व्यक्तिम्रक्षणकान्तिगत्यर्थात् अञ्जधातो निष्पन्नत्वाद् व्यञ्जननाम्नाभिधीयन्ते। अस्मिन् विषये सम्यग्विचारेण स्पष्टं भवति यद् एतेषां वर्णानां या आकृतयः सन्ति तेषां मूलं तत्तद्वर्णोच्चारणे प्रयुज्यमानानि अङ्गानि एव सन्ति। यथा वैदिक ँ ङ, रोमन Mm, इत्यादिवर्णरचनायां उत्फुल्लनासिकायाः, उर्दू नून, रोमन n, हिन्दी चन्द्रबिन्दु ञ—नप्रभृतिवर्णरचनायां आकुञ्चितनासिकाया आकृतिः दरीदृश्यते। एवमेव हिन्दीभाषाया रकारे, उर्दूभाषाया रेवर्णे, रोमनभाषाया r R वर्णे च जिह्वायाः वक्राकृतिः, हिन्दीभाषायाः वकारे रोमनभाषाया P वर्णे, ब्राह्मीलिपेः पवर्णे, उर्दूभाषायाः पेवर्णे च ओष्ठानाम् एका विशेषा आकृतिः परिलक्ष्यते। अनेनैव प्रकारेण विविधलिपीनाम् अध्ययने क्रियमाणे सति लिपेराविष्कारस्य मूलाधारः तत्तदङ्गानां आकृतिषु एव प्राप्तो मया, या आकृतयस्तत्तद्व्यञ्जनस्य उच्चारणकाले भवन्ति। अस्य विस्तृत उल्लेखो वीणापत्रिकायां, त्रिपथगापत्रिकायाञ्च पूर्वमेव कृतो मया।

ब्राह्मीलिपिः सिन्धुलिपिश्च [चित्र सं० १, २, ३]

अनेनैव निकषेण सिन्धुलिपिं परीक्ष्य मया ज्ञातं यत् सिन्धुलिपिरपि तमेव सिद्धान्तमनुसृत्य विनिर्मिताऽऽसीत्। यथा सिन्धुलिपेः दन्त्यसकारः तदुच्चारणकाले दन्तानामाकृतिम् अनुकरोति, तस्य सादृश्यं च उर्दूलिपिः सीनवर्णेन, देवनागरीब्राह्मीलिप्योः सकारेण च स्पष्टं प्रतिभाति। एवमेव सिन्धुलिपेः हवर्णे, उर्दूलिपेः हुश्चमीहे वर्णे; ब्राह्मीदेवनागरीलिप्योः हकारेऽपि काकलेन द्विधा विभक्तस्य कण्ठविवरस्य आकृतिरस्ति एव। सिन्धुब्राह्मीदेवनागरीरोमनलिपीनां रकारदकारवर्णेषु जिह्वावक्रत्वं समानरूपेण परिलक्ष्यते। सिन्धुदेवनगरीब्राह्मीप्रभृतीनां लिपीनां अ–इ–उ–ऊ–प–व–ल–त–क–नादिवर्णेषु अद्भुतं साम्यमस्ति; तेषां मूलञ्च नवर्णोच्चारणाङ्गानां आकृतय

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

d by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

एव सन्ति[1]। अनेन प्रकारेण काँश्चिद् सिन्धुलिपेर्वर्णान् अवधार्य मुद्रालेखानां पठने प्रयत्नो विहितः, परं तदा सिन्धुलिपिः वामतो दक्षिणगामिनी वा, दक्षिणतो वामगामिनी वा इति प्रश्नः समुपस्थितः।

सिन्धुलिपेः दिशा

आसीत् प्रभूतं मतवैभिन्यं सिन्धलिपिदिशाविषये। लैंग्डन-मार्शल-गैढमहोदयास्तां सिन्धुलिपिं दक्षिणतो वामगामिनीं मन्यन्ते स्म, प्राणनाथ-राजमोहननाथशङ्करानन्द-सुधांशुकुमाररेमहोदयास्तु तां वामतो दक्षिणगामिनीं, उभयरूपेण लिखितां वा प्रतिपादयन्ति। कालीबङ्गात् प्राप्तान् त्रीन् लेखान् प्रमाणीकृत्य डा० व्रजवासीलाल-महोदयाः सिन्धुलिपिं दक्षिणतः वामगामिनीमन्यन्त। अत्रान्तरे भगवतीसूत्रनामानं जैनागमं पठता मया तत्र एकं सूत्रम् अवलोकितं यस्मिन् ब्राह्मीलिपिर्नमस्क्रियते ग्रन्थकृता। सूत्रस्यास्य व्याख्याकारो-ऽभयदेवः त्रयोदशीं गाथां उद्धरन् कथयति यद् ब्राह्मीलिपिरेव दक्षिणतो वामगामिनी आसीत् सैव चात्र नमस्क्रियते। अस्या जैनपरम्परायाः पुष्टिः तैरुदाहरणैरपि भवति, यानि ब्यूलरमहोदयः ब्राह्मीलिपेः सेमेटिकमूलत्वं प्रतिपादनार्थं पुरस्कृतवान्। अनेन प्रकारेण ब्राह्मीलिपेः उभयविधिलेखनप्रकारं दृष्ट्वा, यदा मया सिन्धुलिपिः पुनः परीक्षिता तदा तस्य अपि उभयविधलेखनप्रकारः स्फुटोऽभवत्। जानमार्शलमहोदयेनापि स्वग्रन्थे हस्तिदन्तनिर्मितानां वस्तूनां चित्राणि मुद्रितानि सन्ति, येषु चित्रेषु एक एव लेख उभयत उत्कीर्णोऽस्ति दक्षिणतो वामतश्च। अस्य सम्यग्बोधाय एते लेखा द्रष्टव्याः सन्ति—

(1) M. A. C. Pl, Cxiv. 532 लेखे मुद्राद्वयं वर्तते। एकस्मिन् दक्षिणतः, अपरस्मिन् च वामतः 'इन्द्रा उमा' इति लिखितमस्ति।

(2) M. I. C. Pl, Cxiv. 531 लेखेऽपि मुद्राद्वयं विद्यते। एकस्यां मुद्रायां उभयतः स्वाशब्दः लिखितोऽस्ति, तत्र दण्डाकार आ (आवर्णस्य मात्रा) उभयनिष्ठो विद्यते। अपरस्यां मुद्रायां उभय-पार्श्वतः 'सविता' शब्दः लिखितोऽस्ति, यत्र तावर्णं उभयनिष्ठोऽस्ति।

---

(१) 'उर्दू सिन्धुहिन्दीलिपीनामेकत्वम्' ३-चित्रे द्रष्टव्यम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

(3) M. I. C. Pl. Xicv. 530, 529 इत्यत्र मुद्राद्वये एक एव लेखः उभयपार्श्वतो लिखितोऽस्ति ।

(4) स्वाहापत्रिकायां प्रकाशिते एकशृङ्गिलेखे प्रथमस्य षट्त्रिंशत्तमस्य च चित्रस्य अवलोकनेन स्पष्टं भवति यदेक एव लेख भिन्नदिशातः कथं उत्कीर्णो भवति ।

(5) अस्मिन्नेव एकशृङ्गिलेखे अष्टादशलेखस्य 'अणुधा उमा' इति शब्दद्वयस्य तुलना प्रथमेन, षट्विंशत्तमेन च चित्रेण करणीया ।

लिपिचतुष्टयम् [चित्र सं० ४, ५, ६]

इत्थं यदा सिन्धुलेखेषु प्रयुक्तायाः सिन्धुलिपेः द्विविधो लेखनप्रकारः उपलब्धः तदा सचित्रमुद्रालेखानाम् अध्ययनं समारब्धं, यतः एतेषु मुद्रालेखेषु समभिव्यक्तानां विचाराणां सम्पुष्टिः एभिश्चित्रैरेव सम्भाव्यासीत् । अत्रान्तरे हडप्पासम्प्राप्ताभिस्ताभिः मुद्राभिराकृष्टोऽहं मुद्रासु डा० प्राणनाथमहोदयेन भाषाद्वयप्रयोगः स्वीकृत आसीत् । आसां मुद्राणां अध्ययनेन इदं स्पष्टं जातं यदत्र लिखितेषु लेखेषु चतस्रो विवधा लिपयः सन्ति, यद्यपि तत्र प्रयुज्यमानानि अक्षराणि प्राधान्येन सिन्धुलिपेरेव सन्ति । अन्येषां मुद्रालेखानामध्ययनेन अवगतमिदं यत् सिन्धुलिपिवर्णव्यतिरिक्ता ये वर्णा अत्र प्रयुक्ता सन्ति, ते यदा कदा सिन्धुलिपिवर्णानां मध्येऽपि प्रयुज्यन्ते । किमेते वर्णाः विशिष्टानि चिह्नानि सन्ति, किमेते कस्यचिद् दार्शनिकाभिप्रायस्य अवबोधनार्थं विरचिताः इति सन्देहो जातः । बहुलेखपठनानन्तरं सन्देहो मम सम्पुष्टोऽभवत् । एवं मया निर्णीतं यद् द्विविधरूपेण लिखितायाः सिन्धुलिपेर्व्यतिरिक्ताः केचित् एवंविधाः विशिष्टा वर्णा अपि उपकल्पिता ये गोपनीयार्थप्रकाशका रहस्यात्मका वा आसन् ये वा प्रमुखलिपौ संनिहितानाम् अर्थानां सूत्ररूपेण प्रकाशने समर्था आसन् । एषां वर्णानां तुलना तैर्बीजाक्षरैः कर्तुं शक्यते, यानि बीजाक्षराणि मन्त्रतन्त्रसाहित्ये प्रयुज्यन्ते ।

लेखनप्रकारः [चित्र सं० ४, ५]

उपर्युक्तलेखानामध्ययनेन सिन्धुलिपेरिदमेव अन्यतमं वैशिष्ट्यमभिव्यज्यते यत्तस्यां लिपौ अतिन्यूने स्थाने अधिकतमं लेखनस्य,

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

d by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

तस्य च लेखस्य चित्रमयताकरणस्य प्रवृत्तिरासीत्। यथा 'इन्द्र' इति शब्दस्य इ न द र इति वर्णान् एकपंक्तौ न लिखित्वा, तान् तथा लिखन्ति यथा ऊर्ध्वाभिः अधोरेखाभिर्मानवाकारो निष्पद्येत। एतादृशा शब्दा यद्यपि चित्राणि इव भान्ति, परं ते सिन्धुलिपेः वर्णानां योजनेन निष्पद्यन्ते, ते च शब्दा मया संश्लिष्टवर्णत्वेन अभिमताः।

अग्निवृत्रवरुणादयः सन्ति एवंविधा संश्लिष्टवर्णा ये वर्णमालाक्षरैर्निष्पन्नाः चित्रवत्प्रतियन्ते। यद्यपि यथार्थतस्ते शब्दा एव। एषां संश्लिष्टवर्णानां तुलना अद्यतनप्रचलितनाममुद्राभिः कर्तुं शक्यते। यत्र चित्रात्मकत्वमाधातुं सर्वे प्रयत्नाः क्रियन्ते, अक्षराणां प्रकृतदिशास्थानादीनां विचारो न क्रियते। तत्र अक्षराणि संश्लिष्टानि भवन्ति येन तेषां स्वतन्त्रं रूपं ज्ञातुमसम्भवं भवति। सिन्धुलिपौ अपि अग्निवृत्रवरुणादिसंश्लिष्टवर्णा एतया दृशा एव।

विद्वद्भिरेते संश्लिष्टवर्णाः चित्रसङ्केतरूपेण संगृहीताः। परन्तु एते चित्रात्मका शब्दा विविधवर्णनिर्मिता एव सन्ति, न तु मनुष्यादीनां चित्रसङ्केताः। अस्य कथनस्य सर्वोत्तमं प्रमाणं लिपिद्वयसूच्यां संगृहीतं तत् लेखनसमीकरणमस्ति यत् सप्तमचित्रस्य द्वितीयपङ्क्तौ उपलभ्यते।

अत्र मानवाकारमिन्द्रशब्दं उभयत उकारो विद्यते; यस्योपरि लिखितं इन्द्रस्याद्याक्षरम् 'इ' एतत् सूचयति यद् एतौ उकारौ इन्द्रस्य सम्पत्ती स्तः। उभयोरुकारयोः समीपं लिखितौ 'सु' तथा 'ऐग्नि' शब्दौ प्रकटयतः यद् एतौ उभौ उकारौ सोमाग्न्योः चिह्ने (Symbols) स्तः। एवमत्र वैदिकदर्शनस्येदं रहस्यं सुस्पष्टं भवति यद् अग्नीषोमात्मकमेव इन्द्रतत्त्वं, तस्यैव च उमूसंज्ञा। अत्रेदमपि उल्लेखनीयमस्ति यत् लेखसमीकरणे दक्षिणतो यद् 'उम्' लिखितमस्ति तत्र मकारः। एष च सिन्धुलिपेः चतुष्कोणविनिर्मितेन अकारोत्तरेण मकारेण सर्वथा भिन्नः तिष्ठति। 'उम्' इति अक्षरे सम्प्रयुक्तो मकारस्तु तिसृभिः लम्बरेखाभिर्विनिर्मितोऽस्ति। यतः आभिः रेखाभिः इन्द्राग्निसोमसम्बन्धिनां त्रिविधानां उकाराणां संख्यानिर्देशोऽप्यभिमत आसीत्। अतो घटितोऽयमभिमतार्थः यत् 'उम्' बीजाक्षरे त्रयाणां समावेशोऽस्ति यस्य द्योतनार्थमेवंविधस्य मकारस्य सर्जनं कृतम्। वैदिक-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

संहितासु उम्-शब्दो बहुशः प्रयुक्तोऽस्ति स च वेदभाष्यकारैर्निरर्थकः स्वीकृतः।

अस्य शब्दस्य वास्तविकं रहस्यं तु सिन्धुमुद्राया उक्तलेखेन एव समुद्घाटितम्। जानन्ति वेदज्ञा यदयं उम्-शब्दः पदपाठे दीर्घोकार-रूपेण आयाति, संहितापाठे तु ह्रस्वोकाररूपेण परिणमति। अस्य निदर्शनं त्रयोदशे चित्रे उपलभ्यते। (p.41 चित्र सं 13)

p.41 अत्र प्रथमपंक्तिस्थिते चित्रे मध्यस्थाने सिंहासनस्थः पुरुष इन्द्र एव। तस्य शिरसि द्वयोरुकारयोः संयोगेन सञ्जातो दीर्घ उकारो मुकुटमिव शोभते। इन्द्रमुभयतः संस्थितौ द्वौ पुरुषौ सोमाग्नी स्तः, यौ स्वकीयज्योतिःप्रतीकं ह्रस्वोकारं तस्मै समर्पयन्तौ स्तः। पूर्वलेख-वद् अस्याभिप्रायोऽपि सुस्पष्टः यद् इन्द्रस्य ज्योतिषि अग्निसोमयोः ज्योतिः संनिहितमस्ति। संघातरूपस्य तस्य ज्योतिषः स्थितिः पुरुषस्य तस्मिन् शरीरे स्वीक्रियते, यद् ऋग्वेदे 'सुवर्चस् तनु' रूपेण स्मृत-मस्ति, यच्च स्थूलशरीरविनाशानन्तरमपि अवशिष्यते।

अस्यास्तन्वाः स्वरूपप्रतिपादिका प्रथमा आकृतिर्विद्यते या मूलतः एकस्य वृहदुकारस्योपरि द्वयोरुकारयोः स्थापनात् सिध्यति (आकृति-संख्या ८) अत्र उकारत्रयेभ्यः व्यतिरिक्तं द्वे मयूरशिरसी, वृहदु-कारस्य मध्ये सर्पावच्छेदाश्च सन्ति। अत्र चित्रितो मयूरस्तु असंशय-मेव मृतस्य सुवर्चस्तनुवाहको वेदवर्णितो गरुत्मान्, पुराणवर्णितो गरुडो वा अस्ति। सर्पावच्छेदास्तु तं वृत्रमेव प्रकटयन्ति यः सुदासो भूत्वा आत्मनः सहयोगी भवति, प्रतिकूलो भूत्वा तु दस्युर्वा शत्रुर्वा कथ्यते।

एकोऽपूर्वः क्रासः [चित्र सं० ७] p.35

एतादृशमेकं अपूर्वं साङ्केतिकचिह्नं (Symbol) क्रासरूपेण हडप्पानगरे उपलब्धायामेकस्यां मुद्रायां (मुद्रासंख्या २५५) उप-लभ्यते। सिन्धुलिप्यां ब्राह्मीलिप्यां च एष क्रासो वर्णरूपेण स्वीकृ-तोऽस्ति परं प्रस्तुतमुद्रायां (आकृतिसंख्या ३ प्लेटसंख्या ४) अस्य क्रासस्य केन्द्रस्थले एकश्चतुष्कोणोऽस्ति यः सिन्धुलिपेर्मकारोऽस्ति। अतोऽयं क्रासस्तु 'कम्' नामकं बीजाक्षरं विद्यते। अस्य व्याख्या उक्तमुद्रायाः पृष्ठभागे अङ्कितया श्येनाकृत्या क्रियते। अस्य श्येनस्य

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

d by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, .

विस्तृते एकस्मिन् वामे पक्षे सर्पस्य, दक्षिणे च मयूरस्य आकृतिर्विद्यते। सामान्यक्रासस्तु संस्कृतभाषायाः कवर्णत्वात् प्रश्नात्मकः प्रश्नसूचको वा भूत्वा आत्मनो ऽनिर्वचनीयत्वं निर्गुणत्वञ्च अभिव्यनक्ति। उपर्युक्तं 'कम्' नामकं बीजाक्षरन्तु तस्यैवात्मनस्तत् सगुणत्वं विकारोन्मुखत्वञ्च द्योतयति यत्र सर्पगरुत्मन्तौ वृत्रवृत्रघ्नौ वा समन्वितौ तिष्ठतः। एतौ उभौ हडप्पानगरस्य अस्थिकलशेषु अङ्किते उकारत्रयनिर्भिते 'उम्' नामके साङ्केतिकचिह्नेऽपि दृष्टौ। यथा पूर्वमेव निरूपितं यद् एते त्रय उकारा अग्निसोमेन्द्ररूपाणां अकारत्रयाणां ज्योतिषि सन्ति। अस्मिन् क्रासनामके साङ्केतिकचिह्ने एतास्तिस्रः शक्तयः परस्परं मिलित्वा ऊर्ध्वलम्बरेखाभिः मकारात्मकं केन्द्रं निर्माय अ—उ—मरूपस्य ओ३म् शब्दस्य रचनां कुर्वन्ति।

त्रिविधोऽकारः त्रीणि लिङ्गानि च

निर्विकारस्यात्मनो योऽकारोऽत्र लम्बरेखारूपेण प्रस्तुतः स एव विकारसहिते आत्मनि नारिकेलोपमो दीपशिखोपमो वा भूत्वा सिन्धुलिपेर्द्वितीयोऽकारो भवति अयञ्च अग्निसोमेन्द्ररूपत्रिविधशक्तिमतः त्रिलिङ्गात्मकस्य अकारत्रयस्य संयुक्तसाङ्केतिकचिह्नरूपेण, वर्णरूपेण विद्यते। अस्मात् पूर्वं लिखितो 'वृत्रद्वय'-शब्दः चित्रगतयोरुभयोः सर्पयोर्द्योतकोऽस्ति। यौ सर्पौ चित्रे अग्निसोमयोरुपरिच्छायां कुरुतः। चित्रेऽङ्किताः ऐग्नि, न मन इति शब्दा द्योतयन्ति यदिदं चित्र अग्निशक्तेः प्राणस्य साङ्केतिकचिह्नम् (Symbol) न तु मनसः।

नाकं—सु ३

'नाकं सु ३' अप्यस्ति एतादृशमेकं संयुक्तं बीजाक्षरं (आकृतिसंख्या ४ चित्र संख्या ४, ७) यत् पूर्वकथितस्य अन्नान्नादप्रतीकस्य (Symbol) एकं रूपान्तरमेव। एतद् बीजाक्षरं स्पष्टीकर्तुं 'अन अग्नि षण्मन नर' नामको लेखोऽस्ति। लेखोऽयं द्योतयति यदिदं बीजाक्षरं अननामकेन अग्निना सहितस्य, षड्विधमनसा युक्तस्य नरदेहस्य प्रतीकः (Symbol) अस्ति। बीजाक्षरस्य उपरिभागे उकारात्मकं ऊर्ध्वबुध्नं चमसमस्ति यस्य मध्यभागे त्रिधा स्थितः सु-शब्दः त्रिपृष्ठं पवमानं सोमं द्योतयति। अत्र अधोभागे नकारः दण्डाकारेण विभ-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

ज्यते, उभयभागसंयोजकं मध्यवर्ति 'कं' इति अक्षरं द्वाभ्यां चक्ररेखाभ्यां विनिर्मितम् अस्ति, ऊर्ध्वपुधनसोमचमसात् स्रवन्त्यः षड्विधमनोधारा अपि प्रदर्शिताः सन्ति। अस्य तुलना तैत्तिरीयोपनिषद्गतेन तेन 'ऊर्ध्व-पवित्रेण' त्रिशङ्कुना अमृतोद्धृतेन सुमेधसा कर्त्तुं शक्यते यः शरीर-वृक्षस्य प्रेरकः स्मृतः—

अहं वृक्षस्य रेरिवा, कीर्तिः पृष्ठं गिरेरिव।
ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि।
द्रविणं संवर्चसं सुमेधा अमृतोक्षितः॥ इति

त्रिशङ्कोर्वेदानुवचनम्।

इदमेव संयुक्तं बीजाक्षरं स्वकीयनानाविधरूपेषु सिन्धुमुद्राचित्रि-तस्य एकशृङ्गिपशोः पुरतो दृश्यते। अनेन समयेन सहस्रम् एकशृङ्गि-पशुचित्रितमुद्राः प्राप्ताः, अतः सर्वासां व्याख्या तु न शक्या कर्तुम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

d by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, .

सिन्धु-भाषा

लिपिस्तु लेखगता भाषा एव। लिपेरभिज्ञानाद् ऋते भाषाज्ञाने नाऽस्ति काचिद् गतिः। अतः सिन्धुलिपिज्ञाने मया यः प्रयत्नः कृतः तेनैव सिन्धुभाषाज्ञानमपि स्वतः सिद्धम्। लिपीनाम् उपर्युक्ततुलनात्मकेन अध्ययनेन अकारादीनां मूलवर्णानाम् अनुमानं सञ्जातम्, तेषां च सादृश्यात् केषुचित् मुद्राचित्रेषु त एव अकारादय इति स्पष्टं ज्ञातं मया। पश्यन्तु भवन्तोऽकारमूलः कश्चित् पिप्पलवृक्षः (चित्र संख्या ६) तस्य अकारस्य उपरि सिन्धुभाषायाः लकारवर्णः पुष्करपर्णमिव वर्तते। वैदिकवाङ्मये 'वाक् पुष्करपर्णम्' (शः ब्रा. ६, ४, १, ७); योनिर्वै पुष्करपर्णम् (श. ब्रा. ६, ४, १, ७, ६, ४, ३, ६, ८, ६, ३, ७) इति वचनात् पुष्करपर्णम् शक्तिप्रतीकत्वेन स्वीकृतम्। अकारेण सह तस्य योगात् नानापिप्पलपर्णानां प्रभवञ्च दृष्ट्वा 'एकोऽवर्णः बहूना शक्तियोगात् नानावर्णान्नहितार्थो दधातीति' श्वेताश्वतरस्य वचनं स्मृतिपथमायातम्। अतएव अवर्णः खलु ब्रह्मवाचकः, लवर्णः शक्तेर्वाचकः, तयोः संयोगेन समुद्भूतः नानापर्णवान् पिप्पल वृक्षः विविधरूपसृष्टेर्वाचक इति अनुमितम्।

अत्र अवर्णोपरिस्थितस्य पुष्करपर्णाकृतिलकारस्य शक्तिवाचकत्वं, योनित्वं च अन्यथाऽपि सिध्यति। 'आपः पुष्करपर्णमिति (श. ब्रा. ६, ४, १, ९; ६, ४, २, २; ७, ३, १, ६; ७. ४, १, ८; १०, ५, २, ६) योनिर्वैपुष्करपर्णमिति (श. ब्रा. ६, ४, १, ७; ६, ४, ३, ६; ८, ६, ३, ७) अद्भ्यो हीदं सर्वं जायते (श. ब्रा. ६, ८ २, ३) इति च ब्राह्मणवचनात्। 'अप एव ससर्जादौ' इति स्मृतिवचनादपि च लकारः अवर्णात्मकस्य ब्राह्मणः शक्ति—रूपिणी अपस्वरूपिणी वा प्रथमा सृष्टिरित्यनुमीयते। अयमेव पुष्कराकृतिर्लकारः इन्द्रस्य पुरं कथ्यते, इन्द्रः अस्यैव पुरस्य पौर उच्यते, अस्मिन्नेव आपोमये पुरे इन्द्रो

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

वृत्रहत्यानन्तरम् अभयं लभते[1]। वृत्रवधात् तु सृष्टिप्रसंग एव सूचितः ब्राह्मणग्रन्थेषु इति तु प्रतिपादितमेव मया वैदिकदर्शननाम्नि ग्रन्थे। इन्द्रो ह वै वृत्रं हत्वा विश्वकर्माऽभवत्प्रजापतिः (ऐ० ब्रा०, ४, २२) इत्यपि अस्मादेव कारणाद् उक्तम्। अतएव नास्ति किञ्चिदपि अप्रासंगिकम् अस्मिन् आख्याने

उपयुक्ते चित्रे पुष्करपर्णाकृतिलकारस्योपरि वर्तते ओकारयकाराभ्यां निर्मितः ओम् शब्दः। अत्र ओमिति शब्दः पुष्करपर्णवाच्येभ्यः अद्भ्यः एव निस्सृत इति गोपथब्राह्मणे (गो० पू० १, २६) उक्तम्—प्रासरणमाप्नोतेराकारपकारौ विकर्यावादित ओकारो विक्रीयते। द्वितीयो मकार एवं द्विवर्ण एकाक्षर ओमित्योङ्कारो निवृत्तः। अयमेव ओंकारः आपोमये पुष्करे संसृष्टो ब्रह्मा, यम अवर्णात्मकं ब्रह्म जजान इति उच्यते गोपथब्राह्मणे[2] इममेव 'ओङ्कारं ब्रह्मणः ज्येष्ठं पुत्रं दद्रशुः' देवाः (गो० पू० १, २३); स्यात् उक्तलकारात्मकरोद्भवत्वादेव 'लातव्यो गोत्रः ब्राह्मणः पुत्र इति' (गो० पू० १, २५) उच्यते, पूर्वोक्तं आपोमयं पुष्करस्वरूपम् आपोमयञ्च इन्द्रपुरं स्मृत्वा एव 'ओमिति इन्द्रः' (जै० उ० १, ९, २) 'तस्मिन्नपः प्रतिष्ठिता' (जै० उ० १, १०, २) इत्युक्तम्।

अत्र अकारलकारयोः ओकारमकारयोश्च संयोगात् जातः 'अल ओम्' शब्दः एव यहूदीधर्मस्य इलोहीमशब्दस्य इस्लामधर्मस्य च अल्लाहशब्दस्य मूलं प्रतिभाति। अस्य शब्दस्यैव वाच्यात् जायते अस्य चित्रस्य पिप्पलवृत्तात्मकः सृष्टिवृत्तः एकादशपर्णात्मकः। तत्र बहिर्भूतानि पत्राणि बृहदारण्यकोक्तानि[3] सप्तान्नानि सन्तु. अपरपत्रचतुष्टये द्वे मनुष्यवित्ते, द्व च दैववित्ते स्तः। एभिरेव एकादशपत्रैः यदि एकादशेन्द्रियसमष्टिरपि सूच्येत, तर्हि नाऽस्ति किञ्चिदाश्चर्यम्।

---

(१) इन्द्रो वृत्रं हत्वा नास्तृषीति मन्यमानोऽपः प्राविशत्ता अब्रवीद् बिभेदि वै पुरं मे कुरुतेऽपि। स यो अपां रस आसीत्तमूर्ध्वं समुदोहंस्तामस्मै पुरमकुर्वंस्तद्यस्मै पुरमकुर्वंस्तस्मात्पूष्करं पूष्करं ह वै तत् पुष्करमित्याचक्षते परोक्षम् (श. ब्रा. ७, ४, १, १३)

(२) ब्रह्मा वै ब्रह्माणं पुष्करे संसृजे (गो० पू० १, १६)

(३) १, ५, ३–१०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

d by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

एष एकादशविधः प्रपञ्चसारस्तु द्विविध एव—अन्नम् अन्नादश्च । अन्नं तु उपर्युक्ता भोग्यरूपा अन्नवित्तसमष्टिः एकादशविधा वृक्षात्मिका । अन्नादश्च तत्र ओङ्कारवाच्यस्य आत्मन एव कश्चित् पक्षविशेषः । स एव अग्निः अन्नादोऽग्निः । (श० २, १, ४, २८; २, २, ४, १). इति उक्तत्वात् । अन्नादः अत्ता[1] अत्रिर्वा भवति । अत एव उपर्युक्ते सिन्धुमुद्राङ्किते चित्रे वृत्तस्य अधोभागे 'अत्रि अग्नि एकदस अन्नवित्तमा' इति लिखितं दृश्यते ।

तत्र कोऽयं नाम अग्निरन्नादः ? ओशब्दान्तर्गतो दक्षिणहस्तवर्त्ती यः मकारार्धात्मकः उकारः तस्मिन् अस्ति किंचित् विवृतमुखं सग्रीवं पशुशिरः, तदेव अन्नादस्य अग्नेः प्रतीकं अदनक्रियारतमुखत्वात् । अन्यः उकारात्मकः मकारार्धपशुः केवलं द्रष्टुः सोमस्य प्रतीक एवाऽस्ति, सोम एवैष प्रत्यक्षं यत्पशुरिति ब्राह्मण-श्रवणात् (कौ० १२, ६) । पुनश्च प्रत्येकस्मिन् सग्रीवशिरसि सकारोकारयोः संयोगात् 'सु' इति, कर्णे पकारः, शृङ्गे रकारः, शृंगमूलात् मुखपर्यन्तञ्च नकारः वर्तते; अनेन विधिना द्वौ सुपर्णशब्दौ अग्नि संयुक्तौ इदं श्वेताश्वतरवक्त्रं स्मारयतः—

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते,
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥

एतौ द्वौ एव अन्यत्र "ज्ञाज्ञौ द्वावजावीशानीशौ"[2] इति उच्येते । एतावेव द्वौ ज्ञाज्ञपुरुषौ छन्नोदरोस्थाने प्राप्तायां मुद्रायां पिप्पलवृक्षेण संयुक्तौ दृश्येते अस्मिन् चित्रे[3] । अत्र द्वयोरपि पुरुषयोः उकारात्मको भुजभंगः सार्थकोऽस्ति, यतः पूर्ववदेवात्र वामवर्ती उकारः सोमस्य सूचकः अपरस्तु दक्षिणवर्ती अग्नेः । अग्नीषोमात्मकं जगदिति स्मरणात् सृष्टिवृक्षेण सह अग्नीषोमयोः संयोगः समीचीन एव ।

अनयोः उकारयोः संयोगात् जायते कश्चिदूकारः यः प्रथमसृष्टिवृक्षचित्रे मकारस्य विलोमरूपे तिष्ठति 'ओमिति इन्द्रः' इति पूर्वो-

---

(१) स वैः सोऽत्ताग्निरेव सः (श. १०, ६, २, ८); अत्तिर्ह वै नामैतद्यदत्रिरिति (ऋ. १४, ५, २, ८,)

(२) ज्ञाज्ञौ द्वावजावीशानीशावजा ह्येका भोक्तृभोग्यार्थयुक्ता (श्वे, १,९)

(३) चित्र सं, (६)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

खितवचनार्त् इन्द्रस्य प्रतीकः प्रतिभाति । अस्यैव पुष्टिरत्र चित्रेण लेखेन च भवति । अत्र चित्रे द्वौ पुरुषौ स्वं स्वम् उकारमध्यस्थाय मध्यस्थिताय पुरुषाय प्रयच्छतः, मध्यस्थितस्य पुरुषस्य शिरसि च उकारद्वयस्य संयोगेन निर्मितः ऊकारः तिष्ठति । उकारद्वयेन मध्यस्थस्य पुरुषस्य ऊकारनिर्माणं लेखेऽपि अन्येन विधिना आलिखितम् । अत्र मध्यस्थस्य पुरुषस्य स्थाने इन्द्र शब्दं एव पुरुषाकारः लिखितः तिष्ठति, तस्य पार्श्ववर्त्तिनौ उकारौ इन्द्रशब्दस्य इकारेण युक्तौ स्वस्मिन् ऐन्द्रं स्वामित्वं दर्शयतः । तयोर्वाम उकारः सोमसूचकः दक्षिण उकारश्च अग्निसूचकः इति तयोः समीपे लिखिताभ्यां 'सो' शब्दं 'ऐग्नि' शब्दाभ्यां सूचयतः । चित्रस्य लेखस्य च तुलनया द्वयोः पार्श्ववर्तिनोः अग्नीषोमात्मकयोः उकारयोः संयोगात् मध्यस्थस्य (ऐन्द्रस्य) ऊकारस्य निर्माणं भवति । ऊकारशीर्षः पुरुषश्च इन्द्रो भवतीति सिद्धम् ।

इन्द्रस्यास्मिन् ऊकारे द्वयोरन्ययोरपि उकारयोः संयोगो मन्यते । प्रथमसृष्टिवृत्तचित्रे पूर्वोल्लिखिते ऊकारे वर्तते वृत्ताकारः अनुस्वारः यस्य बलेन ऊकारः ऊमिति त्रिमात्रात्मक इव उच्चार्यते । अत एव उपर्युक्तलेखे द्वयोरपि उकारयोः संयुक्तरूपम् उकारत्रयेण (III) इति प्रदर्शितम् । उक्तः वृत्ताकारः अनुस्वारः चित्रे ऊकार्युक्तेन द्विमात्रिक-दण्डाकारेण आकारेणाऽपि संयुक्तः 'ऊमा' इति चतुर्मात्रिकः इव उच्चार्यते । अतएव ऊमा शब्दः उकारचतुष्टयेन युक्तः (VIII) इत्येव प्रदर्शितः । अत्र एकोऽस्ति सचित्रः लेखः यः मध्यस्थस्य इन्द्रशब्दस्य पार्श्ववर्तिनम् उकारं क्रमशः ऊम् (VIII), ऊमा (७), शब्दाभ्यां सूचयन् उपस्थापयति दक्षिणकरेण लिखितं 'अनज' शब्दम् । किं अनजशब्देन ऊंपदवाच्यस्य ऊमापदवाच्यस्य च अजात् जन्म लक्ष्यते ? यदि इदमेव स्यात्, तर्हि ऊंपदवाच्यः इन्द्र एव भवति यः चित्रे पुरुषाकारः तिष्ठति; भोक्तृभोग्यार्थयुक्ता अजा भवति, बहिर्गतः बद्धाञ्जलिः बालकः

अजं ध्रुवं सर्वतत्त्वैर्विशुद्धमिति उपनिषद् वचनस्य लक्ष्यभूते (श्वे. १, १५) पुरुषाकारः अजः अस्मिन् चित्रे प्रतिभाति, तमेव पुरुषाकारं वेष्टयन्ती लतातन्तुः च भोक्तृभोग्यार्थयुक्ता एका अजा भवति उमा । बहिर्गतः बद्धाञ्जलिः बालकः एव वाच्यतायां भोक्ता अजः

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

d by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, .

अग्निरूपेण ग्राह्यः, तत्पृष्ठगतः पशुरेव सोमरूपेण ग्राह्यः ज्ञाता अजः, तत्र इन्द्रस्तु उभयनिष्ठः। एतत्त्रयमेव अधिकृत्य उक्तम्—

अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः॥
(श्वे० ४, ५)

अत्र अग्नीषोमात्मकः द्विविधः अजस्तु एक एव अनीशः पुरुषः, तद्व्यतिरिक्तः ध्रुवः अजः तु अन्यः ईशः इत्युच्यते, तस्य ब्रह्मणः एव महिमानमिति ज्ञात्वा प्रथमः पुरुषः वीतशोकः भवति। तथा चोक्तम्—

समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः।
जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः॥
(श्वेत ४, ७)

अयमेव पुरुषः तुरीयं ब्रह्म अल इति भवति यत् प्रति उक्तम् एकस्मिन् सिन्धुलेखेः—

अनाग्नि ऐग्नि, न अग्नि, न अन्ना
वृत्रवषट् उमा ननर्त
श्रवणजा इन्द्रधा उरु ओम्

अस्यार्थः—अनोऽपि कश्चित् अग्निः, यतः सोऽपि आग्नेयः (ऐग्नि) ज्योतिर्मय इत्यर्थः, परन्तु न सोऽग्निः अन्नादः न च तस्य भोग्यानि अन्नानि वा सन्ति। अन्नादान्नरूपे तु आवृतवषट्कारायाः उमायाः एव नृत्यमस्ति या तेन नृत्येन श्रवणादिषु इंद्रियेषु उत्पन्ना इन्द्रम् अग्नीषोमात्मकं च धारयन्ती उरुः विस्तीर्णा भवति, तथैव च ओंङ्कारोऽपि भवति। भूमा वा अनः (श० ब्रा० १, १, २, ६) यज्ञो वा अनः (श० ब्रा० १, १, २, ७, ३, ९, ३, ३) इति स्मरणात्। बृहदारण्यकेऽपि[1] च प्राणः; व्यानः, अपानः, उदानः, समानः अनश्चेति सर्वे तस्यैव चैतन्यतत्त्वस्य रूपान्तराणि सन्ति यत् समस्तानाम् अन्नानामभोक्तृत्वात् सप्तर्षियज्ञस्य च मूलकारणं भवति।

ओंकारस्य उमायाश्च एषः विस्तारः तयोः मिथुनेन संभवति। प्रथमसृष्टिवृक्षे अस्मादेव मिथुनात् चतुष्कोणात्मकः यो मकारो जायते, स एव मनसः प्रतीको भवति। अस्मिन् मकारे द्वौ त्रिभुजौ

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

स्तः, तयोः एकः अग्निसोमेन्द्रात्मकस्य त्रिधा विभक्तस्य मनसः द्योतकः अपरश्च उक्तज्योतिषां त्रिधाविभक्तस्य आवरकात्मकस्य मनसः प्रतीकोऽस्ति । इदमेव ⊙|||=△ इति समीकरणेन[1] सूचितम् । अनेन प्रकारेण संजातं 'षण्मनः' अन्या एतादृशमपि लिखितं दृश्यते । षण्मन एव सिंधुचित्रेषु षण्मुखायाः द्वयोः चित्रयोः द्रष्टव्यम्[2] (MI c. vol III Pl. CXII, 383; MFEM, Pl. XCVIII, 641) उखा तु ब्राह्मणेषु हृदयाकारं यज्ञपात्रम् अग्नेः आत्मनश्च प्रतीकः (आत्मैवोखा श, ६, ५, ३, ४; ६, ६, २ १५) मानवदेहे उदरम् हृदयम् वाऽपि खा इति (उदरम् उखा श. ७, ५, १, ३८) कथ्यते, तस्मात् कारणात् उखानाम यज्ञपात्रमपि हृदयाकारम् । शरीरगतयज्ञस्य हृदयमेव केन्द्रस्थानम् (तै. ब्रा. ३, १०, ६, ४—८) यत्र मूर्धा, मनः, श्रोत्रं, वाक्, शरीरं रेतश्च समश्रितानि सन्ति । अत एव षड्विधः आत्माऽपि तत्रैवाश्रितः (श. ३, ६, ३, ८) उच्यते । अत एव हृदयप्रतीक उखानामकं यज्ञपात्रमपि । पर्व एतदग्नेर्यदुखा (श. ६, २, ३, २४) शिर एतद् यज्ञस्य यदुखा (श. ६, ५, ३, ८; ६, ५, ४, १५) यज्ञस्य योनिर्वाऽउखा इति च मन्यते । महाभारतेऽपि[3] अग्निरूपेण आत्मना सह उखायाः सम्बन्धं दर्शयितुं 'अन्यो हि अग्निः उखाप्यन्या नित्यमेवमवेहि भोः' इति उक्तम् ।

षण्मुखम् उखापात्रमेव यस्य आत्मनः अग्नेर्वा प्रतीकोऽस्ति स एव, षडङ्गोऽयमात्मा षड्विधः (कौ, २०, ३), सर्वतोमुखोऽयमग्निः अन्नादः (श, २, ६. ३, १०) इति स्मरणात्, षण्मुख आत्म अग्निर्वा प्रतिभाति । पुराणेषु स्कन्दस्याऽपि अग्निमूलत्वात् षडाननोऽपि तस्य षड्विधस्य आत्मनः एव प्रतिरूप इव दृश्यते ।

अनेन विधिना सचित्रान् सिधुलेखान् पठद्भिः अस्माभिः या भाषा प्राप्ता सा वैदिकशब्दबहुला इति स्पष्टमेव । अग्निसोमेन्द्रवरुणवृत्रादयः शब्दाः पदे-पदे दृश्यन्ते, वैदिकप्रतीकाः याज्ञिकसन्दर्भाश्च यत्र तत्र उपलभ्यन्ते । अस्ति तत्र द्विविधा पुष्टिः—प्रथमं तु लेखस्य

(१) लिपिद्वय, १४
(२) स्वाहा, दिस, १९६९, पृ. ३१–३३
(३) म. भा. १२, ३, १५, १५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

d by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

तात्पर्यम् चित्रेण परिपोष्यते, पुनश्च वैदिकसाहित्येनाऽपि तस्य पुष्टि-र्भवति। अतएव नास्ति अत्र सन्देहलेशोऽपि यत् सिन्धुभाषा काचित् संस्कृतभाषैव। सचित्रलेखेषु यत् ज्ञानं लब्धं तदेवाश्रित्य अचित्रमुद्रा लेखा अपि पठिताः। तत्राऽपि सन्ति ईदृशानि वाक्यानिः[1]—

(१) अम्मामा इरा, रौद्रगण एकादश, ईम–अन त्रिदश
(२) वृत्रपंचज्ञातृना। पंचमकार मग
(३) ऋत्रपापन् रुद्रज्ञा जलाष
(४) ज्ञानन्, न यजत्र तपन
(५) मनन अग्न षण्मन अनान्न
(६) सं मां, न रद्नधा, न अन्नानर बुधा।
(७) अग्निस्वस्सा हि स्त्री
(८) जानन् न दर्पा अस्नन्न एकवृत्र
(९) अमन अन्ना उमा
(१०) वृत्र द्वादशम उमा न अग्नि
(११) वृत्र सप्तडस, न अन

यद्यपि एषा भाषा संस्कृतमेव मन्यते, परन्तु अस्ति तत्र किञ्चिद् वैचित्र्यं यथा—

(१) सिन्धुसदृशशब्देषु सकारः हकारः भवति।
(२) क्तप्रत्ययस्थाने त्र इति भवति, यथा भारतस्य स्थाने भारत्र इति।
(३) प्रथमाविभक्तौ विसर्गस्य स्थाने नकारः लभ्यते।
(४) समस्तपदेषु अपि नाऽस्ति प्रायः सन्धिनियमः।
(५) विभक्तयो विरला एव।

(१) चित्र संख्या १८

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

सिन्धु-संस्कृतिः

पूर्वमत्र भागेषु सिन्धुलिपिं सिन्धुभाषां च अधिकृत्य यत्किञ्चित् कथितं मया, तेनेदन्तु स्पष्टमेव भवति यत् सिन्धुभाषा संस्कृतभाषा एवाऽस्ति, सिन्धुमुद्रालेखेषु अभिव्यक्ता विचाराश्च उपनिषद्-ब्राह्मणवचनैः सह साम्यं वहन्ति। तत्राऽपि न केवलम् इन्द्राग्निसोमादीनि वैदिकदेवनामानि बाहुल्येन प्राप्यन्ते, अपि तु उमा, ऊँकारः, ओंकारश्चापि बहुधा उपलभ्यन्ते। इन्द्रादयः देवाश्च एषां त्रयाणामपि अङ्गभूता इव प्रतिभान्ति। पुनश्च एते सर्वेऽपि मानवदेहमधिकृत्यैव कल्पिताः दृश्यन्ते।

तत्र व्यष्टिगतानि त्रीणि ज्योतींषि इन्द्रः, अग्निः सोमश्च सन्ति। उकारो ज्योतिर्वाचकोऽस्ति, अतएव उ 'मा' (उ=॥॥) इति कथ्यते। अत्र 'मा' शब्दः संस्कृतपारसीकप्रभृतिवत् प्रकाशसूचकोऽस्ति। तथैव 'मा' निर्माणेऽपि अस्ति। अतः उमाशब्दस्य अर्थः, उकारस्य प्रकाशस्य निर्मात्री इति वर्तते। अग्नेः सोमस्य च एकैकः डकारः। तयोः संयोगेन इन्द्रस्य ऊकारः भवति। एतेषां त्रयाणामपि समाहारः 'ऊँमिति' ॥U॥ अनेन चिह्नेन ज्ञायते। अयं ऊंकारः अवर इन्द्रो वा उच्यते। अस्यैव ऊँकारस्य शक्तिः उमा उकाराणां निर्मात्री भवति, अस्यैव च सूक्ष्मतरं रूपम् 'ओंकार' इति कथ्यते। अयमेव उपनिषत्सु 'तुरीयः आत्मा' इति श्रूयते। अस्मिन् लीना उमाशक्तिः अवररूपे ऊँकारे सुव्यक्ता भवति।

इयमेव शक्तिः अस्मिन लेखे 'सा इन्द्रो उमा' इति कथिता। लेखस्य पार्श्वभागे काचित् मनुष्याकृतिः एकस्मै वृक्षाय प्रकाशसूचकम् उकारं प्रयच्छन्ती तिष्ठति[1]। लेखस्य अधोभागे वर्तन्ते त्रीणि दृश्यानि। एकस्मिन् दृश्ये वृक्षशाखास्रधारिणौ द्वौ पुरुषौ युद्धरतौ इव दृश्येते। तयोर्मध्ये काचित् पुरुषाकृतिस्तयोः कलहं शमयति।

१. चित्र संख्या ११

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

d by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

प्रत्येकं शाखास्ते पञ्चपत्राणि सन्ति, यानि क्रमशः पञ्चज्ञानेन्द्रियाणां पञ्चकर्मेन्द्रियाणाञ्च द्योतकानि अनुमीयन्ते। अत्र ज्ञातृकर्तृसंघर्षस्य उपरतौ एव अन्यस्मिन् दृश्ये वृक्षस्थः पुरुषः कञ्चिद् व्याघ्रं 'वन' इति पात्रात्मकशब्दात् निवारयितुं समर्थ इव प्रतिभाति। अस्मिन् सिन्धुप्रसंगे 'इन्द्रः' 'उमा' 'वनं' चेति शब्दत्रयं केनोपनिषत्प्रसङ्गं स्मारयति, यत्र ब्रह्मणो विजयेऽहंकारवशात् परस्परं कलहायमानैर्देवैः यदा कश्चित् यज्ञः दृश्यते तदा उमा एव इन्द्रं विज्ञापयति यद् ब्रह्मैव यक्षः, तस्यैव महिम्ना देवा विजयिनः, न तु स्वमहिम्ना इति। इदमेव ब्रह्म तत्र तद्वनमिति उपासितव्यत्वेन मन्यते। अयमेव ओंकारः, यस्य अन्तर्लीना शक्तिः उमा हैमवतीति अत्र प्रादुर्भूता, सैव इन्द्रं प्रबोधयति।

अयमेव शक्तिशक्तिमत्प्रसङ्गः अन्यस्मिन् सिन्धुमुद्राचित्रे अंशतः विभिन्नरूपेण प्रकाश्यते। सन्ति अस्यां मुद्रायां त्रीणि चित्राणि।[२] तत्र एकस्मिन् चित्रे एकस्य ऊर्ध्वबाहुपुरुषस्य हस्तयोः दण्डकारोऽकारो वर्तते, तस्य च सम्मुखे प्रणतायाः नार्याः हस्तयोः मध्ये पकारो विद्यते। अकारस्तु अनस्य आदिवर्णः, पकारश्च पराशक्तेरादिवर्णः; अतएव चित्रस्थितनरनारीयुग्मे अनः (ओंकारः) परा (उमाशक्तिः) चेति अनुमीयते। तयोः संयोगेन 'अप्' शब्दः प्रथमसृष्टिसूचकः 'अप एव ससर्जादौ' इति स्मृतिवचनात्। अद्भ्यः एव जातः उकारः नार्याः पृष्ठतः तिष्ठति तस्यैव पार्श्वे चित्रात्मकः प्राणशब्दो लिखितो दृश्यते। पुरुषस्य पृष्ठभागे द्वौ पशू तिष्ठतः, ययोर्मध्ये प्राणमनस्सूचकचित्रात्मकः शब्दोऽस्ति। द्वयोर्मध्ये एकः पशुः अनं स्पृशति, अन्यस्तु मानवदेहसूचकं वृक्षं स्पृशति। अतएव पशुद्वयेन किञ्चित् प्राणमनोमयं तत्त्वं अनतन्वोर्मध्ये उभयनिष्ठमिव सूच्यते। अन्यस्मिन् चित्रे अनपरायुग्ममेव मानवदेहरूपे वृक्षेऽस्ति। तस्यैव पार्श्वे एकत्र कञ्चिद् व्याघ्ररूपो वृत्रः, अन्यत्र एकः सर्परूपो वृत्रश्च स्तः, व्याघ्रसर्पयोर्मध्ये द्वौ उकारौ, अमाशब्दः, संयुक्त उकारश्च दृश्यन्ते। तेषु उकारौ तु अग्नीषोमौ प्राणौ; ऊकारः इन्द्रप्राणः, अमा च तेषां व्यापिनी पराशक्तिश्च भवन्ति। इन्द्राग्निसोमादीनां प्राणस्वरूपत्वं सिद्धमेव ब्राह्मण-

---

२. चित्र संख्या १२

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

ग्रन्थेषु 'प्राणः सोमः (श. ब्रा. ७, ३, १. २); प्राणो वा अग्निः (शः ब्रा. २, २, २, १५); प्राणो वै ज्योतिः (श. ब्रा. ८, ३, २, १८); प्राण इन्द्रः प्राणा इन्द्रियाणि (तां. म. ब्रा. २, १४, २, २२, ४, ३) अर्द्धभाग्वै मनः प्राणानाम् (ष. १, ५) मनसि वै सर्वे प्राणाः प्रतिष्ठिताः (श. ब्रा. ७, ५, २, ६); कतमे रुद्रा इति, दशेमे पुरुषे प्राणाः प्रतिष्ठिताः (श. ब्रा. ११, ६, ३, ७) इत्यादिश्रवणात्।

शक्तिजन्याः 'बालमात्रादु हेमे प्राणा असंभिन्नाः' (श. ब्रा. ८, ३, ४, १) बालखिल्या इति कथ्यन्ते। प्रथमसृष्टिवृत्तस्य पर्णेषु त एव अनेकरेखारूपेण इङ्गिताः। ते तत्र ऊँकारस्य उमायाश्च मिथुनसम्बन्धादेव जायन्ते। यदा प्राणा एव प्रजारूपेण, ऊँकारात्मा प्रजापतिरूपेण, वाक् च शक्तिरूपेण कल्प्यन्ते, तदा इदमुच्यते प्रजापतिर्वा इदमासीत्तस्य वाग् द्वितीयाऽऽसीत्, तन्मिथुनं समभवत् सा गर्भमधत्त। सास्मादपाक्रामत्सेमाः प्रजा असृजत, सा प्रजापतिमेव पुनः प्राविशत् (ता. म. ब्रा. २०, १४, २)। अस्या एव मिथुनक्रियाया अङ्गभूता इव योनयः लिङ्गानि च बहूनि श्रूयन्ते सिन्धुसभ्यतावशेषेषु। ब्राह्मणग्रन्थेषु अपि तस्य तथ्यस्य छाया विविधरूपेण दरीदृश्यते। योनिरुलूखलम्''' ''' ''' शिश्नं मुसलम् (श. ब्रा०. ७, ५, १, ३८); योनि र्वा उखा (श. ब्रा. ७, ५, २, २); योनिर्वा पुष्करपर्णम् (श. ब्रा. ६, ४, १, ७); योनिर्वा उत्तरवेदिः (श. ब्रा. ७, ३, १, २८) योनिर्वै गार्हपत्या चितिः (श. ब्रा. ७, १, १, ८; ६, ३, ८) योनिरेव वरुणः (श. ब्रा. १२, ६, १, १७) इत्यादि शतपथवचनेषु सा एव द्रष्टव्या।

नाऽत्र 'मा शिश्नेदेवा अपि गुऋतं नः (ऋ. वे. ७, २१. ५) 'ब्रह्मिश्नदेवाँ अभि वर्षसा भूत् (ऋ. वे. १०, ९९, ३) इति ऋग्वेदेन निन्दितं शिश्नदेवत्वं द्रष्टव्यम्। अपितु, अत्र तु अर्थवादः प्रतीकवादो वा ज्योतीरूपशक्तिमधिकृत्य प्रतिपद्यते। तथाविधं शिश्नदेवत्वं तु प्रतिपादयन् अथर्ववेदोऽपि इदमुक्तवान्—

अभिक्रन्दन् स्तनयन्नरुणः शितिङ्गो बृहच्छेपो नु भूमौ जभार।
ब्रह्मचारी सिञ्चति सानौ रेतः पृथिव्यां तेन जीवन्ति प्रदिशः चतस्रः॥
अ. वे. ११, ५, १२.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

d by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

सिन्धुलेखेऽपि एकस्मिन् ⏀ दीपोपमलिङ्गं 'सवितुरंश'[1] इति उच्यते। तदेव ज्योतिर्लिङ्गम् अग्निसोमेन्द्रवाचकत्वेन त्रिलिङ्गमिव ⏀ अनेन चिह्नेन सूच्यते। तदेव पुनः सिन्धुभाषायां अग्निशब्दे ^ (शक्तिं स्फुरदिव), तन्त्रशास्त्रस्य योनिलिङ्गमिव प्रतिभाति। अयमेव अग्निरूप एकलिङ्गशिवो भवति। अस्मादेव कारणात्, रुद्रः, सर्वः, पशुपतिः, उग्रः, अशनिः, भवः, महादेवः, ईशान इति तान्येतान्यष्टौ अग्निरूपाणि भवन्ति शतपथे[2], यानि अन्यत्र शिवनामानीति प्रसिद्धानि। तथैव इदमपि उक्तं ब्राह्मणे—"अग्निर्वै स देवस्तानि नामानि, शर्व इति यथा प्राच्या आचक्षते भव इति यथा वाह्लीकाः, पशूनां पति रुद्रोऽग्निरिति। तान्यस्याशान्तान्येवेतराणि नामान्यग्निरूपत्वादेव वैदिकशिवार्चने अद्यापि अग्निमन्त्राणां विनियोगः दृश्यते। अग्निमन्त्रपूर्वकमेव दीपशिखोपमस्य तिलकस्य विधानं वर्तते सूत्रेषु, तदाकारनारिकेलफलैः बिल्वपत्रैरपि पूज्यते शिवलिङ्गम्।

अग्निर्वै योनिर्यज्ञस्य (श. ब्र. १, ५, २, ११–१४; ३, १, ३, २८; ११, १, २, २;) अग्निर्वै ज्योती रक्षोहा (श. ब्रा. ७, ४, १, ३४) अग्निर्हि रक्षसामपहन्ता (श. ब्रा. १, २, १, ६–९; १, २, २, १३) इत्यादिभिः वाक्यैः अस्य अग्नेः यः सम्बन्धः यज्ञेन वृत्रवधेन च सह ब्राह्मणेषु दृश्यते स एव सिन्धुलेखेषु 'सेष्टिरग्निः, वृत्रजश्नाऽग्नि, वृत्राग्नि उ, सवृत्रजश्न, वृत्रैन्द्रजश्नादिभिः सिन्धुलेखेष्वपि सूच्यते। यथा सेष्टिरग्नि उमा इति सिन्धुमुद्रालेखे[1] उक्तम् तथैव वागेवाग्निः (श. ब्रा. ३, २, २, १३) सा या सा वागाग्निस्सः (जै. उ. १, २८, ३) या वाक् सोऽग्निः (गो. उ. ४, ११) इत्यादिभिर्वाक्यैः ब्राह्मणेष्वपि अग्नेःशक्तिरूपत्वं सिद्धमस्ति।

अपि च सन्ति ईदृशानि प्रमाणानि यैः सिन्धुसभ्यतायाः उत्तरवैदिककालिकत्वं सिद्धं भवति। मोहनजोदरोहडप्पावशेषाणां दर्शनेन तदानीं गोधूमानां प्रचलनमासीत् इति प्रतीयते, यद्यपि संहिताकाले तन्न उपलभ्यते, परन्तु ब्राह्मणकाले तु तेषां प्रयोग आसीदेव, 'यत्पक्ष्मभ्यः (तेजोऽस्रवत्) ते गोधूमाः (श. ब्रा. १२, ७, १, १२);

---

(१) E VIh.VII

(२) श. ब्र. ६, १, ३, १८.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

सोऽयं (पुरुषः) अत्वगेते वै पुरुषस्योषधीनां नेदिष्ठतमां यद्गोधूमांस्तेषां न त्वगस्ति (श. ब्रा. ५, २, १, ६)। तथैव यावत् पुरन्दरस्य उल्लेखः सर्वाधिक संहितासु पौरस्य इन्द्रस्य तु विरल एव भवति, तावत् पुष्करपर्णप्रसङ्गे इन्द्रस्य पौरत्वं तु महनीयमिव प्रतिभाति। अस्मिन् प्रसङ्गे पुरप्रधाना सिन्धुसभ्यताऽपि ब्राह्मणसभ्यतायाः साम्यं लभते।

सिन्धुलेखेषु शक्तेर्यत्स्वरूपं प्राप्यते तदपि ब्राह्मणेषु एव अंशतः लभ्यते, न पुनः संहितासु। तत्र शक्तिः उमा द्विधा विभक्ता—वरुणरूपेण तेजसा आवृणोति, वृत्ररूपेण तमसा। आवरणेन युक्तत्वाद् उभावपि वर्णौ इत्युच्येते, तत्र एकस्य प्रतीकः अहिः, द्वितीयस्य मयूरः। एकस्मिन्[1] हडप्पाप्राप्ते मुद्राचित्रेऽस्ति कश्चिद् उड्डयनोन्मुखः श्येनः यस्य वामपक्षे अहिवर्तते दक्षिणपक्षे च मयूरः। स श्येनः तत्रस्थितस्य चिक्रमस्य (क्रासस्य) व्याख्यार्थं प्रयुक्तः। क्रासस्तु अभिव्यञ्जनोन्मुखो मानवात्मा। स यदि मयूरमभिलक्ष्य दक्षिणवर्ती भवति, तर्हि दक्षिणावर्तस्वस्तिकः तस्य प्रतीको भवति, परन्तु यदि सः अहिमभिलक्ष्य वाममार्गमनुसरति, तर्हि वामावर्तः स्वस्तिकः तस्य प्रतीकः। प्रथमस्तु ज्योतिर्मार्गः कल्याणप्रदो देवयानः, द्वितीयस्तु धूममार्गोऽशुभः वृत्रयानः। अस्मादेव कारणात् सिन्धुचित्रेषु वाममुखा महिषादयोऽनिष्टकरा विरलाश्च, दक्षिणमुखास्तु शान्ता बहवश्च। सिन्धुलेखा अपि दक्षिणगामिनो बहवः, वामगामिनस्तु विरलाः।

---

(1) Excavation at Harappa Pl. XCVII, 501,

(2) M. E. H. Pl. XCI, 255

SRI AUROBINDO LIBRARY PONDICHERRY (India)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

d by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

चित्र सं० १

वर्णमाला

सिंधुघाटी	नागरी	सिंधुघाटी	नागरी
	अ		ग
	इ		घ
	ई		च
	उ		ज
	ऊ		ण
	ए		त
	ओ		द
	ऋ		ध
	अनुस्वार		न
	क		प
	ख		भ

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

चित्र सं० २

वर्णमाला		संश्लिष्ट वर्ण	
सिंधुघाटी	नागरी	सिंधुघाटी	नागरी
	ब		अग्नि
	म		इंद्र
	य		इंदु
	र		वृत्र
	व		मनु
	स		सप्त
	श		अंश
	ह		एकत्रित (एकत+त्रि+त्रित
	त्र		वषट्

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

चित्र सं० ३

सिन्धु, हिन्दी और उर्दू लिपियों की एकता

साधारण हिन्दी-अक्षर	य	र	ल	व	श	ष	स	ह
दण्डाकार भवर्ण और शिरोरेखा रहित हिन्दी-अक्षर	८	९	९	०	१	०	६	६
उर्दू - अक्षर	ے	ر	ل	و	س	ش	س	ہ
सिन्धु-अक्षर	८	)	७	V	४		६,३	४,४
हिन्दी सानुनासिक अक्षर (साधारण)	ङ	ञ	ण	न	म			
शिरोरेखा और दण्डाकार अवर्ण रहित सानुनासिक-अक्षर	ङ	ञ	०	७	८			
उर्दू सानुनासिक-अक्षर	ں	ں	⁼	ں	۾			
सिन्धु सानुनासिक-अक्षर	ᗰ	^	॥,॥	॥	□			
साधारण हिन्दी-अक्षर	अ	आ	इ ई	उ ऊ	ऋ			
हिन्दी - मात्रायें	ा	॥	f ी	ु ू	ृ			
उर्दू - अक्षर	ا	آ	ا ی	ا و	ا			
सिन्धु-अक्षर	ा	॥(((	ऽ	ु	ृ			

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

चित्र सं० ४

EXCAVATIONS AT HARAPPA

Volume II

लिपि-द्वय

1. Pl. XCVII 539



2. Pl. XCVII 517



3. Pl. XCVII 502



4. Pl. XCVII 505



5. Pl. XCVII 506

6. Pl. XCVII 551



7. Pl. XCVII 499



8. Pl. XCVII 501



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

चित्र सं० ५

9. Pl. XCVII 542 

10. Pl. XCVII 543

11. Pl. XCVII 521 

12. Pl. XCVII 545 

13. Pl. XCVII 546 

14. Pl. XCVII 518 

15. Pl. XCVI 442 

16. Pl. XCVI 443 

17. Pl. XCVI 489 

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

चित्र सं० ६

लिपि-त्रय

18. Pl. XCVII 575 

19. Pl. XCVII 580

20. Pl. XCVII 573

21. Pl. XCVII 576

लिपि-चतुष्टय

22. Pl. XCIX 635

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jal

चित्र सं० ७



M E H, Pl. XC III. 318 (आ० सं० २)



M E H, Pl. XC 255 (आ० सं० ३)



M E H, Pl. XCI, 256 (आ० सं० ४)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

चित्र सं० ८



M E H. Pl. L XII, 2

M E H. Pl. L XII, 4

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jal

चि० सं० ६

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

चित्र सं० १०

कुछ सिन्धु-मुद्रा लेख

सिन्धु	देवनागरी
	अनाग्नि ऐग्नि, त अग्नि, न अन्ना
	वृत्र वषट् उमा ननर्त
	श्रवस्यन्ना इन्द्रधा उरु ओम्
	सं मा, न रदनधा, न अन्नानर वुध
	अग्निस्स्वस्सा हि स्त्री
	सस अस्प ललवर
	जानन् न दर्षा अस्तन्न एकवृत्र
	अमन अन्ना उमा
	वृत्र द्वादशम् उमा, न अग्नि
	वृत्र सप्तदस, न अन

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jal

चित्र सं० ११



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

चित्र० सं० १२



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jal

चित्र सं० १३

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

d by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

d by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

d by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

d by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jal



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry